BAGNAN COLLEGE ESTD 1958 Bagnan Howrah

# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-9**

**(Pāṇinian Grammar)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Unit - I

**(Marks : 30)**

1. अधोलिखितसूत्रेषु ***द्वयोः*** व्याख्या कार्या। 7×2

   (a) हलन्त्यम्।

   (b) अणुदित् सवर्णस्य चाप्रत्ययः।

   (c) इको गुणवृद्धी।

2. अधोलिखितयोः दीक्षितवचनयोः कस्य***चिदेकस्य*** आशयः स्फुटीकरणीयः। 6×1

   (a) तेन सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

   (b) यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः।

3. अधोलिखितेषु यथेच्छं ***पञ्चानामुत्तरं*** पूर्णवाक्येन **संस्कृतभाषया देवनागरलिप्या** च लेख्यम्। 2×5

   (a) कति माहेश्वरसूत्राणि? तेषाम् अन्त्या इतः भवन्ति न वा?

   (b) अनुनासिक-संज्ञाविधायकं पाणिनिसूत्रं किम्?

   (c) सवर्णस्य लक्षणं किम्?

   (d) पद-संज्ञाविधायकं पाणिनिसूत्रं लिख्यताम्।

   (e) स्वर-व्यञ्जनयोः सावर्ण्यं भवति न वा? विषयेऽस्मिन् पाणिनिसूत्रं किम्?

   (f) सम्प्रसारणविधायकं पाणिनिसूत्रं लेख्यम्।

   (g) अवसान-संज्ञाविधायकं पाणिनिसूत्रं किम्?

## Unit - II

**(Marks : 25)**

4. अधोलिखितसूत्रेषु कस्य***चिदेकस्य*** व्याख्या कार्या। 7×1

(a) इको यणचि।

(b) स्थानिवदादेशोऽनल्विधौ।

(c) आद्गुणः।

5. अधोलिखितयोः दीक्षितवचनयोः ***एकस्य*** व्याख्या कार्या। 6×1

(a) तन्निमित्तस्यैव इति किम्? ओयते औयत।

(b) पुरस्तादपवादन्यायेनेयं वृद्धिः "एङि पररूपम्" इत्यस्यैव बाधिका, न तु "ओमाङोश्च" इत्यस्य। तेन "अवैहि" इति वृद्धिरसाधुरेव।

6. अधोलिखितेषु ***त्रयाणां*** सूत्रोल्लेखपुरःसरं सन्धिः करणीयः **संस्कृतभाषया देवनागरलिप्या** च। 2×3

(a) गङ्गा + ओघः।

(b) उप + एधते।

(c) प्र + ऋच्छति।

(d) गो + अग्रम्।

(e) दैत्य + अरिः।

7. अधोलिखितेषु ***षण्णां*** **संस्कृतभाषया देवनागरलिप्या** च सन्धिविच्छेदः करणीयः। 1×6

(a) पतञ्जलिः।

(b) गव्यूतिः।

(c) मनीषा।

(d) अक्षौहिणी।

(e) दशार्णः।

(f) गवेन्द्रः।

(g) लघूर्मिः।

(h) मध्वृते।

## Unit - III

**(Marks : 20)**

8. अधोलिखितसूत्रेषु यथेच्छ**मेकस्य** व्याख्या कार्या। 7×1

   (a) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

   (b) सरूपाणामेकशेष एकविभक्तौ।

   (c) यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।

9. अधोलिखितेषु यथेच्छं ***द्वयोः*** पदयोः **संस्कृतभाषया देवनागरलिप्या** च साधनप्रक्रिया प्रदर्श्यताम्। 5×2

   (a) रामाय।

   (b) रामाभ्याम्।

   (c) सर्वे।

   (d) सर्वेषाम्।

10. अधोलिखितेषु यथेच्छं ***त्रयाणां*** शब्दरूपं लिख्यताम्। 1×3

   (a) राम-शब्दस्य द्वितीयायाः बहुवचनस्य रूपम्।

   (b) राम-शब्दस्य षष्ठ्याः बहुवचनस्य रूपम्।

   (c) सर्व-शब्दस्य (पुंलिङ्गे) प्रथमायाः एकवचनस्य रूपम्।

   (d) सर्व-शब्दस्य (पुंलिङ्गे) तृतीयायाः एकवचनस्य रूपम्।

   (e) राम-शब्दस्य सप्तम्याः बहुवचनस्य रूपम्।

———————